# Shri Ganesha Stuti Nandikeshakrita

# નન્દિકેશકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Nandikeshakrita

File name : gaNeshastutiHnandikeshakRRitA.itx

Category : ganesha, mudgalapurANa, stuti, ekAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 11 | 8.11 39-52||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# નન્દિકેશકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

નન્દિકેશ ઉવાચ ।

નમસ્તે ગણેશાય શાન્તિપ્રદાય સદા શાન્તિરૂપાય શાન્તેર્ધરાય ।

નરાણાં હૃદિસ્થાય નાગાકૃતીનાં હૃદિસ્થાય યોગાય યોગેશ્વરાય ॥ ૩૯॥

હેરમ્બાય નમસ્તુભ્યં સિદ્ધિબુદ્ધિવિહારિણે ।

સ્વાનન્દપાય ચૌરેશ વાહનાય નમો નમઃ ॥ ૪૦॥

પાર્વતીપતયે તુભ્યં શિવચિત્તગતાય વૈ ।

લક્ષ્મીપતે નમસ્તુભ્યં વિષ્ણુચિત્તસ્થમૂર્તયે ॥ ૪૧॥

સંજ્ઞાપતે નમસ્તુભ્યં ભાનોર્હૃદિ સ્થિતાય ચ ।

આદિશક્તિપતે તુભ્યં શક્તિચિત્તગમૂર્તયે ॥ ૪૨॥

સાવિત્રીપતયે તુભ્યં બ્રહ્મણો હૃદિ ખેલક ।

ગાયત્રીપતયે તુભ્યમોઙ્કારચિત્તવાસિને ॥ ૪૩॥

શચીપતે નમસ્તુભ્યમિન્દ્રચિત્તગમૂર્તયે ।

સ્વાહાપતે પરેશાયાગ્નિહૃદિસ્થાય તે નમઃ ॥ ૪૪॥

નરરૂપાય વૈ તુભ્યં ભિન્નસૌખ્યપ્રચારિણે ।

સર્વત્ર ભિન્નભાવેષુ નરાય તે નમો નમઃ ॥ ૪૫॥

નિર્ગુણાય નમસ્તુભ્યં કુઞ્જરાકારમૂર્તયે ।

સર્વત્રાભેદસૌખ્યેષુ નિર્ગુણેષુ સ્થિતાય ચ ॥ ૪૬॥

નરકુઞ્જરરૂપાય યોગાકારાય તે નમઃ ।

યોગાનાં પતયે તુભ્યં પૂર્ણયોગસ્વરૂપિણે ॥ ૪૭॥

ધન્યોઽહં કૃતકૃત્યોઽહં યેન દૃષ્ટો ગજાનનઃ ।

કિં સ્તૌમિ બ્રહ્મ બ્રહ્મેશ નમસ્તે વરદો ભવ ॥ ૪૮॥

એવં સ્તુત્વા ગણેશાનં નનર્ત પ્રેમસંયુતઃ ।

નન્દીશસ્તં જગાદાસૌ ગણેશો ભક્તવત્સલઃ ॥ ૪૯॥

(ફલશ્રુતિઃ)

શ્રીગણેશ ઉવાચ ।
વરાન્ વૃણુ મહાભાગ નન્દિંસ્તે મનસીપ્સિતાન્ ।
દાસ્યામિ તપસા તુષ્ટઃ સ્તુતઃ સ્તોત્રેણ માનદ ॥ ૫૦॥
ત્વયા કૃતમિદં સ્તોત્રં યોગદં તુ ભવિષ્યતિ ।
ભુક્તિદં કામિકાયૈવ મુક્તિદં મોક્ષમિચ્છતે ॥ ૫૧॥
સર્વસિદ્ધિકરં ભાવિ પઠતાં શ‌ૃણ્વતાં સદા ।
યં યમિચ્છન્તિ તં તં તે લભન્તેઽનેન નિશ્ચિતમ્ ॥ ૫૨॥

ઇતિ નન્દિકેશકૃતા શ્રીગણેશસ્તુતિઃ શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥
એકાદશસ્તોત્રં
- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૧૧ । ૮.૧૧ ૩૯-૫૨॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 11 . 8.11 39-52..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Nandikeshakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*